श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीसुदर्शनाष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीसुदर्शनाष्टोत्तरशतनामस्तोत्रम् ॥

सुदर्शनश्चक्रराजः तेजोव्यूहो महाद्युतिः।
सहस्रबाहुर्दीप्ताङ्गः अरुणाक्षः प्रतापवान् ॥ 1 ॥

अनेकादित्यसङ्काशः प्रोद्यज्ज्वालाभिरञ्जितः।
सौदामिनीसहस्राभो मणिकुण्डलशोभितः ॥ 2 ॥

पञ्चभूतमनोरूपो षट्कोणान्तरसंस्थितः।
हरान्तः करणोद्भूतरोषभीषणविग्रहः ॥ 3 ॥

हरिपाणिलसत्पद्मविहाराारमनोहरः।
श्राकाररूपस्सर्वज्ञः सर्वलोकार्चितप्रभुः ॥ 4 ॥

चतुर्दशसहस्रारः चतुर्वेदमयोऽनलः।
भक्तचान्द्रमसज्योतिः भवरोगविनाशनः ॥ 5 ॥

रेफात्मको मकारश्च रक्षोसृग्रूषिताङ्गकः।
सर्वदैत्यग्रीवनाळविभेदनमहागजः ॥ 6 ॥

भीमदंष्ट्रोज्ज्वलाकारो भीमकर्मा त्रिलोचनः।
नीलवर्त्मा नित्यसुखो निर्मलश्रीर्निरञ्जनः ॥ 7 ॥

रक्तमाल्याम्बरधरो रक्तचन्दनरूषितः।
रजोगुणाकृतिश्शूरो रक्षःकुलयमोपमः ॥ 8 ॥

नित्यक्षेमकरः प्राज्ञः पाषण्डजनखण्डनः।
नारायणाज्ञानुवर्ती नैगमान्तःप्रकाशकः ॥ 9 ॥

बलिनन्दनदोर्दण्डखण्डनो विजयाकृतिः।
मित्रभावी सर्वमयो तमोविध्वंसकस्तथा॥ **10** ॥

रजस्सत्त्वतमोद्वर्ती त्रिगुणात्मा त्रिलोकधृत्।
हरिमायागुणोपेतः अव्ययोऽक्षस्वरूपभाक्॥ **11** ॥

परमात्मा परं ज्योतिः पञ्चकृत्यपरायणः।
ज्ञानशक्तिबलैश्वर्यवीर्यतेजःप्रभामयः॥ **12** ॥

सदसत्परमः पूर्णो वाङ्मयो वरदोऽच्युतः।
जीवो गुरुर्हंसरूपः पञ्चाशत्पीठरूपकः॥ **13** ॥

मातृकामण्डलाध्यक्षो मधुध्वंसी मनोमयः।
बुद्धिरूपश्चित्तसाक्षी सारो हंसाक्षरद्वयः॥ **14** ॥

मन्त्रयन्त्रप्रभावज्ञो मन्त्रयन्त्रमयो विभुः।
स्रष्टा क्रियास्पदश्शुद्धः आधारश्चक्ररूपकः॥ **15** ॥

निरायुधो ह्यसंरम्भः सर्वायुधसमन्वितः।
ओङ्काररूपी पूर्णात्मा आङ्कारस्साध्यबन्धनः॥ **16** ॥

ऐङ्कारो वाक्प्रदो वाग्मी श्रीङ्कारैश्वर्यवर्धनः।
क्लीङ्कारमोहनाकारो हुंफटक्षोभणाकृतिः॥ **17** ॥

इन्द्रार्चितमनोवेगो धरणीभारनाशकः।
वीराराध्यो विश्वरूपो वैष्णवो विष्णुरूपकः॥ **18** ॥

सत्यव्रतस्सत्यपरः सत्यधर्मानुषङ्गकः।
नारायणकृपाव्यूह तेजश्चक्रस्सुदर्शनः॥ **19** ॥

॥ इति श्रीसुदर्शनाष्टोत्तरशतनामस्तोत्रं समाप्तम्॥